चेतव्यम्, चापयितव्यम्-चाययितव्यम्, चिकीषितव्यम्-चिचीषितव्यम्, चेचीयितव्यम्;

चयनीयम्, चापनीयम्-चायनीयम्, चिकीषणीयम्-चिचीषणीयम्, चेचीयनीयम्;

चेयम्, [A]निकाय्यः,[1] [2]संचाय्यः, [3]परिचाय्यः, [B]उपचाय्यः, चित्या,[4] [C]अग्निचित्या, चाप्यम्-चाय्यम्, चिकीष्यम्-चिचीष्यम्, चेचीय्यम्;

ईषच्चयः-दुश्चयः-सुचयः; — —

चीयमानः, चाप्यमानः-चाय्यमानः, चिकीष्यमाणः-चिचीष्यमाणः, चेचीय्यमानः;

[5]पुष्पप्रचायः, [D]फलोच्चायः, पुष्पप्रचयः, [6]तण्डुलनिचायः, [E]एकनिश्चायः,

---

1. निचीयतेऽस्मिन् धान्यादिकम् इति **निकाय्यः**=निवासः। अधिकरणे यत्। 'पाय्यसान्नाय्य**निकाय्य**धाय्यामानहविर्**निवास**सामिधेनीषु' (3-1-129) इत्यनेन ण्यति, आयादेशो धात्वादेः ककारश्च निपात्यते।

2. संचीयतेऽसौ **संचाय्यः**=क्रतुविशेषः। कर्मणि ण्यत्। '**क्रतौ कुण्डपाय्यसञ्चाय्यौ**' (3-1-130) इत्यनेन ण्यदायादेशौ निपात्येते।

3. 'अग्नौ **परिचाय्योपचाय्य**समूह्याः' (3-1-131) इति ण्यदायादेशौ निपात्येते अग्न्याधारस्थलविशेषस्य एवं नाम।

4. चीयतेऽसौ **चित्यः**=अग्निः। कर्मणि यत्प्रत्यये निपातनात् तुक्। अग्नेः चयनम**ग्निचित्या**। भावे यत्प्रत्ययः, निपातनात् तुक् च। '**चित्याग्निचित्ये** च' (3-1-132) इति निपातितौ। **अग्निचित्या** इत्यत्र स्त्रीत्वं स्वभावात्।

5. 'हस्तादाने **चे**रस्तेये' (3-3-40) इति घञ्, अजपवादः। 'अस्तेये' इत्युक्तत्वात् चौर्येण आदाने 'एरच्' (3-3-56) इत्यजेव। **पुष्पप्रचयः** इति यथा।

6. 'परिमाणाख्यायां सर्वेभ्यः' (3-3-20) इति घञ्। अजपवादः। एवं **एकनिश्चायः** इत्यत्रापि परिमाणार्थकत्वात् घञेव।

A. 'न प्राणाय्यो जनः कश्चित् **निकाय्यं** तेऽधितिष्ठति, भ. का. 6-67.

B. 'कथाभी रमसे नित्य**मुपचाय्य**वतां शुभे॥' भ. का. 6. 68.

C. 'कुण्डपाय्यवतां कच्चिद**ग्निचित्या**वतां तथा।' भ. का. 6-68.

D. 'निशोपशायः कर्तव्यः **फलोच्चायश्च** संहतैः॥' भ. का. 7-41.

E. 'ततः कपिसमाहार**मेकनिश्चाय**मागतम्।' भ. का. 7-34.